CC-0. Digitized by eGangotri and MIDF- Delhi

द्याजीप्रभृतीनामेकदेशः प्राशयितव्यः॥ अथसंश्रवप्राशनम्। तत्राचम्योत्थाय फलपुष्प
समन्वितघृतेनस्रुवंपरिपूर्य। ॐमूर्द्धानमित्यस्यभारद्वाजऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवतापू
र्णाहुतिहोमेविनियोगः॥ ॐमूर्द्धानंदिवः। इतिपूर्णाहुतिः। ततः स्रुवेणभस्मानीयदक्षिण
करानामिकागृहीतभस्मना। ॐआयुषमितिनारायणऋषिरनुष्टुप्छन्दःआयुर्देवताभ
स्मनातिलककरणेविनियोगः॥ ॐआयुषंजमदग्नेरितिललाटे। ॐकश्यपस्यआयुषमिति
ग्रीवायाम्॥ ॐयद्देवेषुआयुषमितिदक्षिणबाहुमूले। ॐतन्नोअस्तुआयुषमितिहृदि॥
इतिआयुषंकुर्यात्। दूर्वाक्षतादिब्राह्मणाभोजनंच॥ ॥इत्यन्नप्राशनम्॥ ॥अथचूडाक

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥ तत्र संवत्सरानंतर मादित्या दिषु द्वौ ऽयनआपूर्य्यमानपक्षे शुक्लात्रादि दोषरहि
तेरिक्तादिदोषवर्जिते॰ सोमबुधगुरुशुक्रान्यतमवार॰ विहितनक्षत्र समन्वितायां॰ तिथौ कृतनि
त्योयजमानोमातृपूजापूर्वकाभ्युदयिकंकृत्वा॰ ब्राह्मणान्भोजयित्वामङ्गलेपरिस्कृतभूमौ
कुशकंडिकामारभेत्॥ तत्रक्रमः॥ कुशैःपरिसमूह्यतानेशान्यांपरित्यज्यगोमयोदकेनोपलिप्य
स्रुवमूलेनप्रादेशमात्रंत्रिरुल्लिख्योद्धरेत्तनक्रमेणानामिकांगुष्ठाभ्यामुद्धृत्यवारिणाभुक्ष्य॰
।कांस्यपात्रेणाग्नीमादायप्रत्यङ्मुखंमग्नेरुपसमाधानंकुर्यात्॥ ततोऽग्नेःपश्चिमदिशियज
मानदक्षिणादिशित्रीणिपीठानिसंस्तीर्यतत्रनवासःपरिधाप्यकुमारंमंकेनिधायमाताउपविशति। ततः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पुष्पचंदनताम्बूलवस्त्राभरणादीमानतनवाक्यम्। ॐ अद्यकर्त्तव्यचूडाकरहोमकर्मणिकृताकृ
तावेक्षणरूपब्रह्मकर्मकर्तुअमुकगोत्रंअमुकशर्माणंब्राह्मणमेभिः पुष्पचंदनताम्बूलवासो
भिर्ब्रह्मत्वेनत्वामहंवृणे। इतिब्राह्मणंवृणुयात्। ॐवृतोस्मीतिप्रतिवचनम्॥यथाविहितंक
र्मकुरु इतियजमानेनोक्ते ब्रह्माणमदक्षुखंनत्वोपवेश्य।ततोब्रह्माण्वारब्धपातितद
क्षिणाजानुः समिद्वृतमेग्रोजुहुयात्।तत्रप्रत्याहुत्यनंतरंस्रुवावस्थितशेषघृतस्यप्रोक्ष
णीपात्रेप्रक्षेपः॥ ॐप्रजापतयइतिप्रजापतिर्ऋषिस्त्रिष्टुप्छंदः प्रजापतिर्देवताआज्य
होमेविनियोगः। ॐप्रजापतयेस्वाहा॥इदंप्रजापतये इतिमनसा॥ ॐइन्द्रायेतिप्रजा

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पतिर्ऋषिस्त्रिष्टुप्छन्दः इन्द्रोदेवता आज्यहोमे विनियोगः।ॐइन्द्रायस्वाहा। इदमिन्द्राय। इत्याघा
रौ।ॐअग्नयेइतिप्रजापतिर्ऋषिरग्निर्देवता आज्यहोमे विनियोगः।ॐअग्नयेस्वाहा। इदमग्नये॥ॐ
सोमायेतिप्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः सोमोदेवता आज्यहोमे विनियोगः।ॐसोमायस्वाहा। इदं
सोमाय इमाज्यभागौ।ॐभूर्भुवःस्वरितिमहाव्याहृतीनांप्रजापतिर्ऋषिःकमेगागाअधिगागनु
मुभश्छंदोसित्यग्निर्वायुसूर्यादेवता आज्यहोमे विनियोगः।ॐभूःस्वाहा। इदंभूः।ॐभुवःस्वाहा।
इदंभुवः।ॐस्वःस्वाहाः इदंस्वः। एतामहाव्याहृतयः।ॐत्वन्नोअग्नइतिवामदेवऋत्रिष्टुप्छंदो
ग्नीवरुणौदेवते आज्यहोमे विनियोगः॥ॐत्वन्नः इदमग्नीवरुणाभ्याम्।ॐसत्वन्नइतिवामदेव

Jagannath Bhattarai Collection, Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ऋषित्रिष्टुप्छंदोऽग्नीवरुणौदेवतेआज्यहोमेविनियोगः॥ॐसत्वन्नः।इदमग्नीवरुणाभ्याम्।ॐआ
याश्चाग्नइतिवामदेवऋषिर्बृहतीछंदोऽग्निर्देवताआज्यहोमेविनियोगः।ॐआयाश्चाग्ने·इदमग्नये।
ॐयेनेशानामिमिवामदेवऋषित्रिष्टुप्छंदोवरुणाःसविता·विष्णुर्विश्वेदेवामरुतःस्वर्कादेवता·आज्य
होमेविनियोगः।ॐयनेशानम्॥इदंवरुणायसवित्रेविष्णवेविश्वेभ्योदेवेभ्योमरुद्भ्यःस्वर्केभ्यः।ॐउ
दुत्तममितिशुनःशेफऋषित्रिष्टुप्छंदोवरुणोदेवताआज्यहोमेविनियोगः।ॐउदुत्तमं।इदंवरु
णाय॥एनाःप्रायश्चित्तेसंज्ञकं॥ॐप्रजापतयइतिप्रजापतिऋषित्रिष्टुप्छंदःप्रजापतिर्देवताआज्य
होमेविनियोगः॥ॐप्रजापतयेस्वाहा·इदंप्रजापतये·इतिमनसा।इतिप्राजापत्यम्।ॐअग्नयेस्विष्ट

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कृतइतिप्रजापतिर्ऋषिरग्निर्देवताविष्टकृद्धोमेविनियोगः।ॐअग्नयेविष्टकृतेस्वाहा॰इदमग्नयेवि
ष्टकृते॥इतिविष्टकृत्।अथसंस्रवप्राशनम्॥ततः आचम्य॰अद्यकृतैतच्चूडाकरणाहोमकर्मणिकृता
कृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थंइदम्पूर्णपात्रंप्रजापतिदैवतंअमुकगोत्रायामुकशर्मणेब्राह्मणा
यब्रह्मणेदक्षिणात्वेननुभ्यमहंसंप्रददे।इतिदक्षिणांब्रह्मणेदद्यात्।ॐस्वस्ति॰इतिप्रतिवचनम्॥त
तःप्रणीताविमोकः।तत्त्वायामीत्यृङ्मित्रियाइतियजुषोर्द्वयोःप्रजापतिर्ऋषिरापोदेवताप्रणीताविमो
केविनियोगः॥ॐसुमित्रियानआपओषधयःसंतुइतिपवित्राभ्यांशिरःसमृज्य।ॐदुर्मित्रियास्तस्मैसंतु
योस्मान्द्वेष्टियंचवयंद्विष्मः॥इत्येशान्यांप्रणीतापात्रंनुद्वीकुर्यात्॥ततःबर्हिर्होमः।ॐदेवागातुविदइ

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्यस्यवनस्यतिऋषिर्विराट्छंदोवानोदेवतावर्हिर्होमेविनियोगः॥ ॐ देवागातुविदः इतिवर्हिर्होमः॥॥
अथशीतोदकउष्णोदकेन॰ ॐ उषोनवाइतिमंत्रस्यपरमेष्ठीऋषिः प्रतिष्ठाछंदऋग्रुद्रोदेवताऽदका
सेकेविनियोगः। ॐ उषोनवायऽउदकेनेह्यद्रिकेशान्त्वपेतिमंत्रेणाभिषिञ्च॰ तत्रभिषिञ्च॰ तत्रभिश्रो
दकेनवनीताद्यन्यतमप्रपिंडनूषणीप्रक्षिप्यदक्षिणपश्चिमोत्तरक्रमेणपूर्वनिशावद्धकुमारकेशजूटि
काश्चयेदक्षिणाजूटिकायां। ॐ सवित्रेतिमंत्रस्यप्रजापतिर्ऋषिर्गायत्रीछंदआपोदेवताक्लेदने विनियोगः॥
ॐ सवित्राप्रसूताऽदेवाआपऽउंदंतुतेतनूंदीर्घायुत्वायवलायवर्चसे॰ इतिमंत्रंपठित्वा।तेनैववारिणाप्रक्षा
ल्यशुद्धकीकटकेनतूष्णींविवरणंकृत्वाभागत्रयंकुर्यात्। ततःसप्तविंशकुशपत्रतःकुशपत्रत्रयमानीयत

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

केशमूलसंलग्नाग्रजूटिकाप्रथमभागमध्यांतरितंकुर्यात् ॥ ॐ ओषधेत्रायस्वेतिमंत्रस्य प्रजापतिर्ऋषिर्यजुस्त
रणंस्वधितिर्देवताक्लेदनेविनियोगः ॐ ओषधेत्रायस्वस्वधितेमैन ꣳ हि ꣳ सीः इतिमंत्रेण ॥ ॐ शिवोनामासि
प्रजापतिर्ऋषिर्दृहतीछंदः क्षुरोदेवताक्षुरग्रहणेविनियोगः ॐ शिवोनामासिस्वधितिस्तेपितानमस्तेअस्तु
मामाहि ꣳ सीः ॥ इतिमंत्रेण लोहक्षुरंगृहीत्वा ॥ ॐ निवर्त्तयाम्यायुषेन्नाद्यायप्रजननायरायस्पोषायसुप्रजास्त्वायसुवीर्याय · इतिमंत्रेण
जूटिकासंलग्नंकुर्यात् ॥ ऊर्द्धपत्रत्रयमहिंजूटिकांछिनत्ति ॥ ॐ येनावपदितिमंत्रस्य आलंबायनऋषिः
पंक्तिश्छंदःसवितादेवताकेशश्मश्रुणांछेदनेविनियोगः ॥ ॐ येनावपत्सविताक्षुरेणसोमस्यराज्ञोवरुणस्यविद्वान्

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नेननेब्रह्मणोवपनेदमस्मायुष्यंजरदष्टियथासत्। इतिमंत्रेण॥ततःस्तोध्वनकुशपत्रत्रयसहितंजूटिका
मानदुहेगोमयपिण्डोपरिउत्तरस्यांदिशिनिदधात्। अत्रैवपूर्वप्रक्षालितापरभागद्वयेकुशपत्रत्रितयंतन्नि
धानादिछेदनवर्जंसर्वंपूर्ववदेवः छेदनंतूष्णीम्। ततःपश्चिमजूटिकायांपूर्ववत्। तेनैवमंत्रेणप्रक्षाल
नम्। तूष्णींशस्त्रकीकंटकेभागत्रयकरणम्। केशमूलसंलग्नाग्रकेशांतरितमध्यकुशपत्रत्रयधारणम्॥
क्षुरग्रहणम्। ततःसंयोजनानिनन्नमंत्रेणैव। ततःप्रथमजूटिकाछेदनमंत्रः ॐ आयुषमग्निनारायणाऋषि
ःउष्णिक्छंदःआशीर्देवताछेदनेविनियोगः। ॐ आयुषंजमदग्नेरितिमंत्रेण। ततःपूर्ववद्गोमयपिण्डेके
शरधारणम्। तत्रावशिष्टभागद्वयेकुशपत्रत्रयकेशांतरितनिधानादिछेदनवर्जंसर्वंपूर्ववदेवछेदनंतूष्णीमेव॰

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ऽनकुशपवित्रत्रयसहितकेशानांगोमयपिण्डेधारणंचाततउत्तरभागजूटिकायांप्रक्षालनादिक्षुरसंयोगांते
षुपूर्ववत्तत्तन्मंत्रप्रयोगः॥प्रथमजूटिकाछेदनमंत्रः।ॐयेनभूरिश्वरेतिमंत्रस्यवामदेवऋषिर्यजुःक्षरोदे
वताछेदनेविनियोगः।ॐयेनभूरिश्वरोदिवंज्योक्कपश्याधिसूर्यंतेनतेवपाधिब्रह्मणाजीवातवेजीवनाय
सुश्लोकायस्वस्तयेततनःकेशान्गोमयपिण्डेनिदधात्॥ततोवशिष्टभागद्वयेकुशपवित्रत्रयकेशांतर्निधानादि
छेदनवर्जंसर्वंपूर्ववदेवछेदनंतूष्णीं।गोमयपिण्डोपरिधारणमपि।ततःसमस्तंशिरस्त्रिःक्षुरंप्रदक्षिणा
क्रमेणानुप्रकेशंभ्रामयतिॐयत्क्षुरेरोनंमज्जयतासुपेशसावप्त्वावापयतिकेवांश्चिन्नि॥शिरोमास्यायु
ःप्रमोषीःइतिमंत्रेण॥ततस्तोयैरेवाद्भिःसमस्तंशिरःप्रक्षाल्यॐअक्षुण्णावन्निति मंत्रस्यवामदेवऋषिर्यजुः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क्षुरोदेवताभ्रामणेविनियोगः॥ॐयत्क्षुरेणेनमज्ञयतासुपेशासावप्त्रावापयतिकेशाश्मश्रूनि।शिरोमास्यायुःप्रमो
षीःइतिमंत्रेण॥ततस्ताभिरद्भिःसमस्तंशिरःप्रक्षाल्य।ॐअक्षुरवनितिमंत्रस्यवामदेवऋषिर्यजुःक्षुरोदेवता
क्षुरदानेविनियोगः॥ॐअक्षुरवन्यरिवपइतिनापितायक्षुरंप्रयच्छति।अथनापितःशिखांधृत्वासमस्तंशिरो
वपनंवायथाकुलंकुर्यात्॥ततोध्रूनखकेशान्नूतनवस्त्रेणप्रतीच्यमानादधिभक्षसमन्वितगोमयपिण्डोपरि
निदध्यादितिसमाचारः॥तत्रपूर्णाहुतिः॥ॐमूर्द्धानमित्यस्यभरद्वाजऋषिस्त्रिष्टुप्छंदोऽग्निर्देवतापूर्णाहुतिहो
मेविनियोगः॥ॐमूर्द्धानंदिवःइतिमंत्रेण॥ततःस्रुवेणभस्मानीयआयुषंकुर्यात्॥ॐआयुषमितिनारायणऋ
षिरुष्णिक्छंदःआयुर्देवताभस्मनालिलकेकरणेविनियोगः॥ॐआयुषंजमदग्नेरितिललाटे।ॐकश्यपस्यत्र्या

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

युष्मभिनिग्रीवायाम्॥ ॐ यद्देवेषुत्रायुषमिनिदक्षिणाबाहुमूले। ॐतन्नोअस्तुत्रायुषमिनिहृदि॥इनित्रायुषंकुर्यात्। ततोदूर्वाक्षतादि।ततस्तान्केशान्गोमयपिण्डान्गोमयपिण्डान्·गोष्ठेसस्त्रीरेऽन्यस्मिन्नुदकांतरेवा निदध्यात्।तत्रआराद्रोज्यादिकमपि॥ ॥इतिचूडाकरणंसमाप्तम्॥ ॥अथकर्णवेधः॥ ॥तत्रतृतीये वर्षेपंचमेवा·पुष्येन्दुचित्राहरिरेवत्यन्यतमनक्षत्रसमन्वितकिंहनतिथिपूर्वाह्णेपिता·अन्योवाभिमुखोपविष्टःकुमारस्यदक्षिणाकर्णमभिमंत्रयेत्॥ ॐभद्रंकर्णेभिरितिमंत्रस्यप्रजापतिऋषिस्त्रिष्टुप्छंदःलिंगोक्तादेवताकर्णाभिमंत्रणेविनियोगः॥ ॐ भद्रंकर्णेभिःशृणुयामदेवाभद्रंपश्येमाक्षभिर्यजत्राः॥स्थिरैरंगैस्तुष्टुवाँसस्तनूभिर्व्यशेमहिदेवहितंयदायुः॥इतिमंत्रेणदक्षिणाकर्णमभिमंत्र्य।ततः॥ ॐवक्ष्यंतीवेदागनीगंधिकर्णाद्रि मंत्रस्यप्रजापतिर्ऋषिस्त्रिष्टुप्छंदःलिंगोक्तादेवताकर्णाभिमंत्रणेविनियोगः॥ ॐवक्ष्यंतीवेदागनीगंधिकर्णाद्रि

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

This PDF you are browsing is in a series of several scanned documents containing the personal colleciton of Jagannath Bhattarai ji from Kathmandu, Nepal.

CV:

Jagannath Bhattarai
Date of Birth: 31 December 1960
Place of Birth: Kathmandu, Nepal
Address: Nagarjun (Ramkot), Kathmandu

Educational Qualifications
Bachelor of Science (B.Sc.) – Major in Biology
Master's Degree – Sociology & Anthropology
Shastri (Ongoing) – Balmiki Vidyapeeth

Professional Experience
Government School Teacher (Madhyamik Pratham Shreni)
Taught at Secondary Level (Madhyamik)
Taught at Higher Secondary Level (Uchcha Madhyamik)
Served as Head Teacher
Led academic and administrative development
Strengthened institutional performance and student outcomes

Areas of Interest
Sanskrit Vyakaran
Spiritual & Philosophical Studies
Educational Leadership

Digitization by eGangotri Trust
Funding by MIDF, New Delhi